श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ मङ्गळम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीरङ्गनाथ मङ्गळम् ॥

मङ्गळं रङ्गनाथाय मम नाथाय मङ्गळम्।
मङ्गळं लोकनाथाय लक्ष्मीनाथाय मङ्गळम्॥ १ ॥

लक्ष्मीचरणलाक्षाङ्क साक्षि श्रीवत्सवक्षसे।
क्षेमङ्कराय सर्वेषां श्रीरङ्गेशाय मङ्गळम्॥ २ ॥

सैकते सह्यकन्यायास्तरङ्गानिव शीतले।
अतिरङ्गं भुजङ्गेन्द्रे सुखसुप्ताय मङ्गळम्॥ ३ ॥

रजताद्रिनिषण्णेन्द्रनीलशैलानुकारिणे।
शेषे शयाय श्यामाय श्रीरङ्गेशाय मङ्गळम्॥ ४ ॥

बाहुमेकं प्रसार्यान्यं उपदायाति पन्नगम्।
निद्राणाय जगद्रक्षाजागरूकाय मङ्गळम्॥ ५ ॥

परिष्कृतासनाम्भोजपरस्परतलाङ्घ्रये।
स्फुरत्पीताम्बरायास्तु श्रीरङ्गेशाय मङ्गळम्॥ ६ ॥

दर्शिताभयमुद्राय भक्तानां तद्विरोधिनाम्।
दीप्तदिव्यायुधायास्तु श्रीरङ्गेशाय मङ्गळम्॥ ७ ॥

सुस्मिताय सुनासाय सुदृशे सुन्दरभ्रुवे।
सुललाटकिरीटाय श्रीरङ्गेशाय मङ्गळम्॥ ८ ॥

तरङ्गितदयैर्विश्वं अपाङ्गैरभिषिञ्चते।
सम्राजे सर्वलोकानां श्रीरङ्गेशाय मङ्गळम्॥ ९ ॥

इक्ष्वाकोर्विधिलब्धाय विभीषणकृते पुनः।
विस्राणिताय रामेण श्रीरङ्गेशाय मङ्गळम्॥ १० ॥

ज्ञानसिद्धाञ्जनेनास्मद्देशिकैर्दर्शिताय मे।
नित्ये नित्यपूर्णाय श्रीरङ्गेशाय मङ्गळम्॥ ११ ॥

मङ्गळाशासनपरैर्मदाचार्यपुरोगमैः।
सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मङ्गळम्॥ १२ ॥

॥ इति श्रीरङ्गनाथ मङ्गळं संपूर्णम्॥